
# अथ भाषाटीकासहिता ऋषिपंचमीव्रतकथा प्रारभ्यते।



॥ श्रीगणेशाय नमः ॥ ॥ अथऋषिपंचमीव्रतम् ॥ ॥ तच्चमध्याह्नव्यापिन्यांकार्यम् ॥ तथाचमाध
वीयेहारीतः ॥ पूजाव्रतेषुसर्वेषुमध्याह्नव्यापिनीतिथिरिति ॥ दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वविद्धायां
कार्यायुग्मवाक्यात् ॥ प्राप्यभाद्रपदेमासिशुक्लपक्षस्यपंचमीम् ॥ तस्यांमध्याह्नसमयेनद्यादौविमलेज
ले ॥ अपामार्गस्यकाष्ठैश्चह्यष्टोत्तरशतोन्मितैः ॥ अथवासप्तभिःकार्यंदंतधावनमादितः ॥ वनस्पति
प्रार्थना ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वनोदेहिवनस्पते ॥ संप्रार्थ्यानेे
नमंत्रेणकुर्याद्वैदंतधावनम् ॥ तत्रमंत्रः ॥ मुखदुर्गंधिनाशायदंतानांचविशुद्धये ॥ ष्ठीवनायचगात्राणां
कुर्वेऽहंदंतधावनम् ॥ अनेनदंतान्संशोध्यस्नायान्मृत्स्नानपूर्वकम् ॥ ततोब्रह्मकूर्चविधिनापंचगव्यंसंपाद्य
प्राशयेत् ॥ तच्चेत्थम् ॥ देशकालौसंकीर्त्यशरीरशुद्ध्यर्थंब्रह्मकूर्चहोमपूर्वकंपंचगव्यप्राशनमहंकरिष्ये ॥
इतिसंकल्प्य ताम्रादिपात्रे गायत्र्यागोमूत्रं । गंधद्वारेतिगोमयं । आप्यायस्वेतिक्षीरं । दधिक्राव्णइतिद
धि । शुक्रमसिज्योतिरसिइत्याज्यमादाय प्रणवेनालोड्ययज्ञियकाष्ठेनतेनैवनिर्मथ्यप्रणवेनाभिमंत्र्य

सप्तपत्रैर्हरितैः कुशैः पंचगव्यमुद्धृत्य इरावतीतिपृथिव्यै० इदंविष्णुरितिविष्णवे० मानस्तोकइतिरुद्राय० ब्रजजज्ञानमितिब्रह्मणे० अग्नयेस्वाहेत्यग्नये० सोमायस्वाहेतिसोमाय० गायत्र्यासूर्याय० ॐस्वाहेति प्रजापतये० भूर्भुवःस्वाहेतिप्रजापतये० अग्नयेस्विष्टकृतेस्वाहेत्यग्नयेस्विष्टकृते० ॥ एवंदशाहुतीर्हुत्वा हुतावशिष्टं यत्त्वगस्थीतिमंत्रंपठित्वाप्रणवेनप्राशयेत् ॥ होमाकरणपक्षेउक्तमंत्रैःपंचगव्यंसंपाद्यप्राशयेत्॥स्त्रियस्तुतूष्णींपंचगव्यंप्राशयेयुः ॥ ॥ अथव्रतविधिः॥नद्यादिकेतदास्नात्वाकृत्वानियममेवच॥ ब्राह्मणीक्षत्रियावैश्याशूद्रावापिवरानने ॥ कृत्वानैमित्तिकंकर्मगत्वानिजगृहंपुनः ॥ वेदींसम्यक्प्रकुर्वीतगोमयेनोपलेपिताम् ॥ रंगवल्लीसमायुक्तेसर्वतोभद्रमंडले ॥ अव्रणंसजलंकुंभंताम्रंमृन्मयमेववा ॥ संस्थाप्यवस्त्रसंयुक्तंकंठदेशेसुशोभितम् ॥ पंचरत्नसमायुक्तंफलगंधाक्षतैर्युतं ॥ सहिरण्यंसमासाद्यताम्रेणपटलेनवा ॥ वंशमृन्मयपात्रेणयवपूर्णेनचैवहि ॥ आच्छादयेत्तंचैलेनलिखेदष्टदलंततः ॥ तत्रसप्तऋषीन्दिव्याभक्तियुक्तःप्रपूजयेत्॥ ॥अथसंकल्पः॥मासपक्षाद्युल्लिख्यमयाज्ञानतोऽज्ञानतोवारजस्व

लावस्थायां कृतसंपर्कजनितदोषपरिहारार्थमरुंधतीसहितकश्यपादिसप्तऋषिप्रीत्यर्थमृषिपूजनमहंक
रिष्ये ॥ अथपूजाविधिः॥ मूर्तब्रह्मण्यदेवस्यब्राह्मणस्तेजउत्तमम् ॥ सूर्यकोटिप्रतीकाशमृषिवृंदंविचिंत
ये ॥ ध्यानं ॥ आगच्छंतुमहाभागाश्चतुर्वेदपरायणाः ॥ यावद्व्रतमिदंकुर्वेकृपयाभवतामहं॥आवाहनं ॥
ऋग्यजुःसामवेदानांस्वरूपेभ्योनमोनमः ॥ पुराणपुरुषेभ्योहिदेवर्षिभ्योनमोनमः॥आसनम् ॥ गंधपु
ष्पाक्षतैर्युक्तंपाद्यंगृह्णंतुभोद्विजाः ॥ प्रसादंकुरुतप्रीतास्तुष्टाःसंतुसदामम ॥ पाद्यम् ॥ नमस्येशुक्लपंच
म्यामर्चिताऋषिसत्तमाः ॥ दहंतुपापंमेसर्वंगृह्णंत्वर्घ्यंनमोनमः ॥ अर्घ्यम् ॥ लोकानांतुष्टिकर्तारोयूयंस
र्वेतपोधनाः॥ नमोवोधर्मविज्ञेभ्योमहर्षिभ्योनमोनमः॥आचमनम् ॥ पयोदधिघृतंचैवशर्करामधुसंयु
तम् ॥ पंचामृतेनस्नपनंकरिष्येऋषिसत्तमाः ॥ पंचामृतम् ॥ मंदाकिनीगौतमीचयमुनाचसरस्वती ॥
कृष्णाचनर्मदातापीताभ्यःस्नानार्थमाहृतम्१ ॥ स्नानम् ॥ सर्वेनित्यंतपोनिष्ठाब्रह्मज्ञाःसत्यवादिनः ॥

१ जलंगृह्यतामितिशेषः ।

वस्त्राणिप्रतिगृह्णंतुमुक्तिदाःसंतुमेसदा ॥ वस्त्राणि ॥ नानामंत्रैःसमुद्भूतंत्रिवृतंब्रह्मसूत्रकम् ॥ प्रत्येकंच
प्रयच्छामिऋषयःप्रतिगृह्यताम् ॥ उपवीतानि ॥ कुंकुमागुरुकर्पूरसुगंधैर्मिश्रितंशुभम् ॥ गंधाढ्यंचंदनं
दिव्यंगृह्णंतुऋषिसत्तमाः ॥ गंधम् ॥ शुभ्राक्षताश्चसंपूर्णाःप्रक्षाल्यचनियोजिताः ॥ शोभायैवोमयादत्ता
गृह्यंतांमुनिसत्तमाः ॥ अक्षताः ॥ मालतीचंपकादीनितुलस्यादीनिवैद्विजाः ॥ मयाहृतानिपुष्पाणि
पूजार्थंप्रतिगृह्यताम् ॥ पुष्पाणि ॥ वनस्पतिरसोद्भूतोगंधाढ्यःसुमनोहरः ॥ आघ्रेयःसर्वदेवानांधूपोऽयं
प्रतिगृह्यताम् ॥ धूपम् ॥ साज्यंचवर्तिसं० ॥ दीपम् ॥ नानापक्वान्नसंयुक्तंरसैःषड्भिःसमन्वितं ॥ गृह्णं
तुऋषयःसर्वेमयानैवेद्यमर्पितम् ॥ नैवेद्यम् ॥ मध्येपानीयम् उत्तरापो० हस्तप्रक्षाल० करोद्वर्तना
र्थेचं० ॥ नमोवेदविदःश्रेष्ठाऋषयःसूर्यसन्निभाः ॥ गृह्णंत्विदंफलंतुष्टामयादत्तंहिभक्तितः ॥ फलम् ॥
पूगीफलंमहद्दि० तांबूलम् ॥ हिरण्यगर्भेतिदाक्षिणाम् ॥ यानिकानिचपापानिब्रह्महत्यासमानिच ॥
तानितानिविनश्यंतिप्रदक्षिणपदेपदे ॥ प्रदक्षिणाः ॥ नमोस्तुऋषिवृंदेभ्योदेवर्षिभ्योनमोनमः ॥ सर्व

पापहरेभ्योहिवेदविद्भ्योनमोनमः ॥ नमस्कारान् ॥ एतेसप्तर्षयःसर्वेभक्त्यासंपूजितामया ॥ सर्वपापं व्यपोहंतुज्ञानतोऽज्ञानतःकृतम् ॥ प्रार्थना ॥ अथवायनम् ॥ कृतायाःपूजायाः सांगतासिद्ध्यर्थंब्राह्मणायवायनप्रदानंक० ॥ तथाब्राह्मणपूजनंक० ॥ वायनंफलसंयुक्तंसघृतंदक्षिणान्वितम् ॥ द्विजवर्यायदास्यामिव्रतसंपूर्तिहेतवे ॥ भवंतःप्रतिगृह्णंतुज्योतीरूपास्तपोधनाः ॥ उभयोस्तारकाःसंतुवायनस्यप्रदानतः ॥ वायनम् ॥ न्यूनातिरिक्तकर्माणिमयायानिकृतानिच ॥ क्षमध्वंतानिसर्वाणियूयंसर्वेतपोधनाः॥ यांतुदेव० इति विसर्जनम् ॥ एवंसंपूज्यविधिवद्भक्तियुक्तेनचेतसा ॥ तेषामग्रेचश्रोतव्यंशुभंचैवकथानकम् ॥ ॥ इतिपूजाविधिः ॥ ॥ अथकथा ॥ सिताश्वउवाच ॥ श्रुतानिदेवदेवेशव्रतानिसुबहूनिच ॥ सांप्रतंमेसमाचक्ष्वव्रतंपापप्रणाशनम् ॥ १ ॥

दोहा—व्रजवनितनहिय सुखकरन, श्रीयशुदाके लाल । रत्नमालभूषितहृदय, द्रवहु सुमदनगुपाल ॥ १ ॥ राजा सिताश्व ब्रह्माजीसे बोले कि, हे देवताओंके ईश्वर ! मैंने बहुत व्रत सुने परन्तु अब आप कोई पापोंका दूर करनेवाला व्रत मुझे सुनाइये ॥ १ ॥

यह सुन, ब्रह्माजी बोले कि, हे राजन् ! सम्पूर्ण पापोंके दूर करनेवाले सब व्रतोंमें श्रेष्ठ ऋषिपंचमीके व्रतको मैं सुनाता हूं सो आप सुनिये ॥ २ ॥ हे नरशार्दूल! उस व्रतके करनेसे प्राणी फिर नरकको नहीं जाता है. इसीमें एक पुरातन इतिहास मैं तुमको सुनाताहूं ॥ ३ ॥ विदर्भदेशमें एक उत्तंकनामवाला ब्राह्मण था और पतिव्रतमें तत्पर सुशीलानामवाली उस ब्राह्मणकी स्त्री थी ॥ ४ ॥ उस स्त्रीके एक कन्या और एक पुत्र ये दो अपत्य थे. उनमेंसे सुविभूषण नामवाले उसके पुत्रने अङ्ग और पदक्रमसहित वेदोंको पढा ॥ ५ ॥

॥ ब्रह्मोवाच ॥ शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतम् ॥ ऋषिपंचमीतिविख्यातंसर्वपापहरंपरम् ॥ २ ॥ येनचीर्णेनराजेंद्रनरकंनैवपश्यति ॥ अत्रैवोदाहरंतीममितिहासंपुरातनम् ॥ ३ ॥ वैदर्भेचद्विजवरउत्तंकोनामनामतः ॥ तस्यभार्यासुशीलेतिपतिव्रतपरायणा ॥ ४ ॥ तस्याअपत्ययुगलंपुत्रोहिसुविभूषणः ॥ अधीतवान्सुतस्तस्यवेदान्सांगपदक्रमान् ॥ ५ ॥

१ " वैदेहेऽभूद्विज " इत्यपि पाठः । २ शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः । ज्योतिषामयनंचैव वेदांगानि षडेव तु ॥ १ ॥ अर्थः—शिक्षा १, कल्प २, व्याकरण ३, निरुक्त ४, छन्दोग्रन्थ ५, और ज्योतिष ६ यही छह वेदांग हैं ॥ १ ॥

हे नृपसत्तम ! एक कुलीन ब्राह्मणके साथ उनसे अपनी पुत्रीका विवाह करदिया. विवाह करतेही इस कन्याका पति मरगया ॥ ६ ॥ वह विधवा कन्या सतीत्व (पतिव्रतधर्म्म) को पालती हुई पिताके घरमें रहती थी, उसके दुःखसे दुःखित हो, अपने घरमें पुत्रको रखकर ॥ ७ ॥ वह उत्तंक गंगाके किनारेके वनोंमें जाकर उस कन्या और स्त्रीके साथ वहां निवास

**समानेचकुलेतेनसुताचापिविवाहिता ॥ विवाहितैवसादैवाद्वैधव्यंप्रापसत्तम ॥ ६ ॥ सतीत्वंपालयंतीसाआस्तेनिजपितुर्गृहे ॥ तस्यादुःखेनसंतप्तःसुतंसंस्थाप्यवेश्मनि ॥ ७ ॥ गंगातीरवनंप्राप्तःसकलत्रस्तयासह ॥ सतत्राध्यापयामासशिष्यान्वेदंद्विजोत्तमः ॥ ८ ॥ सुताचकुरुतेतस्यपितुःशुश्रूषणंवरम् ॥ पितुःशुश्रूषणंकृत्वापरिश्रांताकदाचन ॥ ९ ॥ निशीथेकिलसंसुप्ताकृमिराशिरजायत ॥ तथाविधांचतांदृष्ट्वाविवस्त्रांप्रस्तरस्थिताम् ॥ १० ॥**

करताहुआ शिष्योंको वेद पढ़ानेलगा ॥ ८ ॥ वह कन्याभी नित्यप्रति अपने मातापिताकी सेवा करा करतीथी. कोई समय वह कन्या पिताकी सेवाकर, थकित हुई ॥ ९ ॥ आधी रात्रिमें सोनेके समय सोती २ कीड़ोंकी राशि होगई. और वस्त्ररहित पत्थरके ऊपर पड़ीहुई शिष्योंने देखी ॥ १० ॥

बड़ी करुणापूर्वक वे सम्पूर्ण शिष्य उसकी मातासे बोले कि– उस पतिव्रताको हम; नहीं जानते कि, वह कृमिराशि किस प्रकार होगई? ॥ ११ ॥ हे जननी ! वह पतिव्रता कृमिराशिमय दीखती है. इस वज्रपातके सदृश शिष्योंकी वाणीको सुनकर ॥ १२ ॥ शीघ्रतासे भ्रांतचित्तवाली वह उसकी माता उसके पास गई और वह उसको कीड़ोंकी

शिष्यानिवेदयामासुस्तन्मातुःकरुणान्विताः॥नजानीमो वयंकिंचिद्देवींसाध्वींतथाविधाम् ॥ ११ ॥
कृमिराशिमयीजातामातःसंप्रतिदृश्यते ॥ वज्रपातसदृक्षंतच्छ्रुत्वाशिष्यैरुदीरितम् ॥ १२ ॥ सा
भ्रांतमानसाशीघ्रंतत्समीपमुपागमत् ॥ सातांतथाविधांदृष्ट्वाविललापसुदुःखिता ॥ १३ ॥ उरश्चताड
यामाससुतरांमोहमापच ॥ क्षणेनप्राप्तचैतन्यातामुत्थाप्यप्रमृज्यच ॥ १४ ॥

ढेरीके समान देखकर, अतिदुखित हो, रोने लगी ॥ १३ ॥ और अपने हृदयमें कराघात करती भई. और अत्यन्त मोहको प्राप्त होती भई अर्थात् मूर्छित हो पृथ्वीपर गिरपड़ी फिर थोड़ी देर पीछे सावधानीसे उठकर और उस कन्याकोभी उठाकर जलसे धोकर साफ किया ॥ १४ ॥

न्याकोभी उठाकर जलसे धोकर साफ किया ॥ १४ ॥

समालंब्यचबाहुभ्यांनिन्येतत्पितुरंतिकम् ॥ स्वामिन्कथयमे साध्वीकेनदुष्कृतकर्मणा ॥ १५ ॥
निशीथेसंप्रसुप्तेयंजायतेकृमिसंकुला ॥ एतच्छ्रुत्वाततोवाक्यमृषिर्ध्यानपरायणः ॥ १६ ॥ ज्ञात्वा
निवेदयामासतस्याःप्राग्जन्मचेष्टितम् ॥ ॥ ऋषिरुवाच ॥ प्रागियंसप्तमेऽतीतेजन्मनिब्राह्मणी
ह्यभूत् ॥१७॥रजस्वलाचसंजाताभांडादीन्यस्पृशत्तदा ॥ अस्यास्तुपाप्मनातेनजायतेक्रिमिवद्वपुः
॥ १८ ॥ रजस्वलायाःपापेनयुक्ताभवतिसाऽनघे ॥ प्रथमेऽहनिचांडालीद्वितीयेब्रह्मघातिनी॥१९॥

और उसको गोदीमें लेकर उसके पिताके पास लेगई और बोली कि—हे स्वामिन्! मेरेसे आप बताइये कि, यह पतिव्रता कौनसे दुष्कर्मसे ॥ १५ ॥ आधरातको सोती २ कीड़ोंसे आच्छादित होगई ? यह सुनकर, वह तपोधन ऋषि ध्यानके द्वारा ॥ १६ ॥ उसके पूर्वजन्मके चरितको जानकर, कहने लगे. ऋषि बोले कि—यह कन्या अपने बीतेहुए सातवें जन्ममें ब्राह्मणी थी ॥ १७ ॥ यह उसी अपने सातवें जन्ममें जब रजस्वला हुई तब घडे बर्त्तन आदि सभीको छूते भई. उसी पहले जन्मके पापसे इसके शरीरमें कीड़े पड़गये ॥१८॥ हे निष्पापे! रजस्वलाके पापसे युक्त पहले दिन चांडालीसंज्ञा

१ ग्रामसूकरीत्यपि पाठः ।

होती है और दूसरे दिन ब्रह्महत्यारी संज्ञा ( या-ग्रामीणशूकरीकी संज्ञा ) होती है ॥ १९ ॥ और तीसरे दिन उसकी धोबिनसंज्ञा होती है. फिर चौथे दिन वह शुद्ध हो जाती है. सो जभी यह शुद्ध हुई थी, तभी इसने सखियोंसहित व्रतको देखकर तिरस्कार करदिया ॥ २० ॥ सो इस कन्याको जो उस व्रतका दर्शन हुवा था उस दर्शनके पुण्यसे तौ इसका जन्म निर्मल ब्राह्मणके कुलमें हुआ और तिरस्कार करनेके पापसे यह कन्या अब कृमिराशि होगई ॥ २१॥

तृतीयेरजकीप्रोक्ताचतुर्थेऽहनिशुद्ध्यति ॥ तदातयासखीसंगाद्व्रतंदृष्ट्वाऽवमानितम् ॥ २० ॥ दृष्ट
व्रतप्रभावेणजाताद्विजकुलेऽमले ॥ अवमानाद्व्रतस्यास्यकृमिराशिमयीधुना ॥ २१ ॥ एतत्तेक
थितंसर्वंकारणंदुष्कृतस्यच ॥ सुशीलोवाच ॥ दर्शनादपियस्यास्यविप्राणांनिर्मलेकुले ॥ २२ ॥
जन्मयुष्मद्विधानांहिजायतेब्रह्मतेजसाम् ॥ अवज्ञयाप्रजायंतेनिशीथेकृमिराशयः ॥ २३ ॥

यह इसके दुष्कर्मका आख्यान हमने सब कहा. यह सुनकर सुशीला बोली कि—हे भगवान्! जिस व्रतके दर्शनमात्रसेही तौ ब्रह्मतेजसे परिपूर्ण आपके सदृश ब्राह्मणोंके निर्मल कुलमें जन्म होता है. और जिस व्रतके अपमान करनेसे रात्रिमें कृमिराशिके समान होजाते हैं ॥ २२ ॥ २३ ॥

---

१ अत्रालोप आर्षः । २ "विग्रहे" इत्यपि पाठः ।

सो हे नाथ ! बड़े आश्चर्य्यके करनेवाले उस व्रतको आप कहिये. यह सुनकर, ऋषि बोले कि हे सुशीले ! सारे व्रतोंमें श्रेष्ठ उस व्रतको तुम अच्छीतरह सुनो ॥ २४ ॥ जिस व्रतके आचरण करनेसे इन सम्पूर्ण पापोंसे प्राणी शीघ्रही छूट जाता है, और निःसन्देह आधिक १ भौतिक २ और दैविक ३ इन तीनों दुःखोंसे छूट जाता है. और इसी व्रतके

महाश्चर्य्यकरंनाथतद्व्रतंकथयस्वमे ॥ ऋषिरुवाच ॥ सुशीलेश्शृणुतत्सम्यग्व्रतानामुत्तमंव्रतम्
॥ २४ ॥ येनचीर्णेनसहसापापादस्मात्प्रमुच्यते ॥ [1]दुःखत्रयाच्चमुच्येतनारीसौभाग्यमाप्नुयात्
॥ २५ ॥ कल्याणानिविवर्द्धंतेसंपदश्चनिरापदः ॥ नभस्येशुक्लपक्षेतुयदाभवतिपंचमी ॥ २६ ॥
नद्यादिषुतदास्नात्वाकृत्वानियममेवच ॥ विधायनित्यकर्माणिगत्वा[2]द्वारवतीमृषीन् ॥ २७ ॥

करनेसे स्त्री सौभाग्यको प्राप्त होती है ॥ २५ ॥ और इसी व्रतके करनेसे सारे कल्याणोंकी वृद्धि होती है और भयरहित सम्पूर्ण सम्पत्तियां होती हैं. जब भाद्रपदके शुक्लपक्षमें पंचमी तिथि आती है ॥ २६ ॥ तब गंगादि पवित्र नदियोंमें स्नान कर और द्वारवती (अग्निहोत्रशाला व कपड़ेका मंडप अथवा घरमें) आकर, नियमपूर्वक, नित्यक्रियाको कर, २७

१ "दुःखत्रयाभिघातजजायतेनात्रसंशयः" । इत्यपि पाठः । २ द्वारवत्याग्निहोत्रशाला वस्त्रमंडपं गृहं वा ।

और विधिपूर्वक पवित्र पंचामृतरसोंसे भक्तियुक्त चित्तसे सप्तर्षियोंको स्नान कराकर चन्दन, अगर, कपूर इनसे छिड़क कर अच्छे २ सुगंधित पुष्प—धूप—दीपादिकोंसे पूजा करै ॥ २८ ॥ यज्ञोपवीतसहित पवित्र वस्त्रोंसे विधिपूर्वक ढककर, मीठे २ फल और मिष्टान्नसे सप्तऋषियोंको भोग लगावै और अर्घ्य दे ॥ २९ ॥ कश्यपजी १, अत्रि २, भरद्वाज ३,

स्नापयेद्विधिवद्भक्त्यापंचामृतरसैःशुभैः ॥ चंदनागुरुकर्पूरैर्विलिप्यचसुगंधिभिः ॥ पूजयेद्विविधैःपुष्पैर्गंधधूपादिदीपकैः ॥ २८ ॥ समाच्छाद्यशुभैर्वस्त्रैःसोपवीतैर्यथाविधि ॥ ततोनैवेद्यसंपन्नमर्घ्यंदद्याच्छुभैःफलैः ॥ २९ ॥ कश्यपोऽत्रिर्भरद्वाजोविश्वामित्रस्तुगौतमः ॥ जमदग्निर्वसिष्ठश्चसप्तैतेऋषयःस्मृताः ॥ ३० ॥ गृहीत्वार्घ्यंमयादत्तंतुष्टाभवतमेसदा ॥ श्रोतव्यमिदमाख्यानं शाकाहारंप्रकल्पयेत् ॥ ३१ ॥

विश्वामित्र ४, गौतमजी ५, जमदग्नि ६, और वसिष्ठजी ७ ये सप्त ऋषि प्रसिद्ध हैं ॥ ३० ॥ सो हे सप्तऋषियो, इस मेरे दियेहुए अर्घ्यको ग्रहण कर, मेरे ऊपर आप सदा प्रसन्न रहिये. इस प्रकार सप्तर्षियोंकी प्रार्थना करै; इस कथाको सुनै; और जो कुछ शाकादिक होय उसको भोग लगावै ॥ ३१ ॥

और सप्तर्षियोंके ध्यानमें तत्पर हो, ब्रह्मचर्यको धारण कर, ऐसी ( पूर्वोक्त ) विधिसे इस व्रतका आचरण करै ॥ ३२ ॥ सारे तीर्थोंके दर्शनादिकसे जो फल होता है और सारे दानोंसे जो फल मिलता है, उन सम्पूर्ण पुण्योंका फल इस व्रतके करनेसे मिलता है ॥ ३३ ॥ जो स्त्री सुखकी इच्छा करनेवाली इस व्रतको आचरण करती है, वह स्त्री सुन्दर रूप

**स्थातव्यंब्रह्मचर्येणऋषिध्यानपरायणैः ॥ अनेनविधिनासम्यग्व्रतमेतत्समाचरेत् ॥ ३२ ॥ तस्यायज्जायतेपुण्यंसर्वतीर्थेषुयत्फलम् ॥ सर्वदानेषुयत्पुण्यंतदस्यव्रतचारणात् ॥ ३३ ॥ कुरुतेयाव्रतंचैतत्सानारीसुखभागिनी ॥ रूपलावण्यसंयुक्तापुत्रपौत्रादिसंयुता ॥ ३४ ॥ इहलोकेसदैवस्यात्परत्राप्यक्षयागतिः ॥ व्रतस्यास्यप्रभावेणजातिंस्मरतिपौर्विकीम् ॥ ३५ ॥ इतिहेमाद्रौब्रह्माण्डेऋषिपंचमीकथासमाप्ता ॥ ॥ ॥ ॥ ॥ ॥ ॥**

और चतुरतायुक्त पुत्रपौत्रादिकोंके साथ ॥ ३४ ॥ इस लोकमें और परलोकमें अक्षयगतिको प्राप्त होती है और इसी व्रतके प्रभावसे अपनी पूर्वजातिकी स्मरण करनेवाली होजाती है ॥ ३५ ॥ इति हेमाद्रौ ब्रह्माण्डान्तर्गता भाषाटीकासहिता ऋषिपंचमीकथा समाप्ता ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथ भविष्योत्तरपुराणान्तर्गतऋषिपंचमीकथाप्रारम्भः। राजा युधिष्ठिरजी श्रीकृष्णचन्द्रजीसे बोले कि–हे देवोंके देव! मैंने बहुत प्रकारके व्रत सुने हैं; परन्तु अब और कोई पापोंका दूर करनेवाला व्रत आप मुझे सुनाइये ॥ १ ॥ यह सुन, श्री-

अथभविष्योत्तरोक्ताऋषिपंचमीकथा ॥ युधिष्ठिरउवाच ॥ श्रुतानिदेवदेवेशव्रतानिसुबहूनिच ॥ सांप्रतंमेऽन्यदाचक्ष्वव्रतंपापप्रणाशनम् ॥ १ ॥ श्रीकृष्णउवाच ॥ अथान्यदपिराजेंद्रपंचमीमृषिसंज्ञिताम् ॥ कथयिष्यामियत्कृत्वानारीपापात्प्रमुच्यते ॥ २ ॥ युधिष्ठिरउवाच ॥ कीदृशीपंचमीकृष्णकथंचऋषिसंज्ञिता ॥ पातकान्मुच्यतेकस्मान्नारीयदुकुलोद्भव ॥ ३ ॥

कृष्णजी बोले कि–हे राजन्! मैं और एक ऋषिपंचमीके व्रतको कहता हूं, जिसके कहनेसे स्त्री सम्पूर्ण पापोंसे छूट जाती है ॥ २ ॥ यह सुनकर, राजा युधिष्ठिरजी बोले–हे यदुवंशियोंको सुख देनेवाले कृष्णचंद्र! वह पंचमी कैसी है? ॥३॥

---

१ शृणुइतिशेषः।

और ऋषिपंचमी उसका नाम क्या हुआ ? और इस व्रतके करनेसे स्त्री पापसे कैसे छुटती है ? ॥ ४ ॥ श्रीकृष्णजी बोले, कि-हे राजन् ! जो स्त्री रजस्वला होकर, घरके काममें लगीहुई ज्ञान अथवा अज्ञानसे भांड (बर्तन) आदिकोंको छूती है ॥ ५ ॥ वह स्त्री बड़ेभारी पापको प्राप्त होती है. और वह निश्चय नरकको जाती है. हे राजन् ! अब तुम

**पापानिचबहून्यत्रविद्यंतेकिलकेशव ॥ कथंवाऋषिपंचम्यांनारीकस्मात्प्रमुच्यते ॥४॥ श्रीकृष्ण उवाच ॥ अज्ञानाज्ज्ञानतोवापियास्त्रीजातारजस्वला ॥ दुष्टास्पृशतिभांडानिगृहकर्मणिसंस्थिता ॥ ५ ॥ प्राप्नोतिसामहापापंसत्यंसानरकंव्रजेत् ॥ शृणुतत्कारणंयस्माद्वर्जनीयारजस्वला ॥ ६ ॥ प्रोत्सार्यागृहतोदूरंचातुर्वर्ण्येनभारत ॥ ब्रह्महत्यांपुराशक्रोवृत्रंहत्वाह्यवापच ॥ ७ ॥**

उस कारणको सुनो, जिस कारणसे रजस्वला स्त्री छोंड़देनेके योग्य है ॥ ६ ॥ हे भारत ! रजस्वला स्त्री ब्राह्मण, क्षत्रिय, वैश्य और शूद्र इन चारों वर्णोंको अपने २ घरसे बाहर निकाल देनी चाहिये; क्योंकि एकसमय पहले इन्द्र वृत्रासुरको मारकर, ब्रह्महत्याको प्राप्त हुए थे ॥ ७ ॥

हे राजाओंमें सिंह ! उस ब्रह्महत्यासे इन्द्र अत्यन्त लज्जित होकर, अपनी शुद्धिके अर्थ ब्रह्माजीके पास गये ॥ ८ ॥ तदनन्तर देवताओंसहित ब्रह्माजीने क्षणमात्र ध्यान करके, हे राजेन्द्र! प्रसन्न चित्त होकर, इन्द्रकी शुद्धि करी ॥ ९ ॥ हे नृपशार्दूल ! उस ब्रह्महत्याके ब्रह्माजीने चार हिस्से करके, उससमय चार जगह रख दिये ॥ १० ॥ हे राजेन्द्र !

**तयावैराजशार्दूलव्रीडितोवृत्रसूदनः ॥ ब्रह्माणंसमुपागच्छदात्मनःशुद्धिकारणात् ॥ ८ ॥ ततोदेवैः समंब्रह्माक्षणंध्यात्वाचकारवै ॥ शुद्धिंशक्रस्यराजेंद्रप्रहृष्टेनांतरात्मना ॥ ९ ॥ विभज्यब्रह्महत्यांतु चतुर्धाचचतुर्मुखः ॥ प्राक्षिपद्राजशार्दूलचतुःस्थानेषुवैतदा ॥ १० ॥ वह्नौप्रथमज्वालासुनदीषुप्रथ मोदके ॥ पर्वतेषुचराजेंद्रनारीरजसिपार्थिव ॥ ११ ॥ अतोरजस्वलानारीप्रोत्सार्याचप्रयत्नतः ॥ ब्रह्मणःशासनात्पार्थचातुर्वर्ण्येनसर्वदा ॥ १२ ॥**

एक भाग अग्निकी प्रथम ज्वालामें, दूसरा नदियोंके प्रथम जलमें, तीसरा हे राजन् ! पर्वतोंमेंभी तथा चौथा भाग स्त्रियोंके रजमें रखदिया ॥ ११ ॥ इसकारण हे युधिष्ठिर ! चारों वर्णोंकरके बड़े प्रयत्नसे रजस्वला स्त्री ब्रह्माजीकी आज्ञासे सदा त्याग देने योग्य है ॥ १२ ॥

आज्ञासे सदा त्याग देने योग्य है ॥ १२ ॥

"उस रजस्वला स्त्रीकी पहले दिन चाण्डाली संज्ञा होती है, दूसरे दिन ब्रह्महत्यारीसंज्ञा होती है और तीसरे दिन धोबिनसंज्ञा होती है; तत्पश्चात् चौथे दिन वह शुद्ध होती है" ॥१३॥ उस स्त्रीका ज्ञान वा अज्ञानसे किसी प्रकारभी साथ हो जाय तो उसका पाप लगता है, उस पापको दूर करनेके अर्थ इस ऋषिपंचमीका व्रत करना उचितहै ॥ १४ ॥

"प्रथमेऽहनिचांडालीद्वितीयेब्रह्मघातिनी ॥ तृतीयेरजकीप्रोक्ताचतुर्थेऽहनिशुद्ध्यति"॥ १३ ॥
अज्ञानाज्ज्ञानतोवापिजातंसंपर्कपातकम् ॥ तत्पापसंक्षयार्थंवैकार्येयमृषिपंचमी ॥ १४ ॥ सर्वपा
पप्रशमनीसर्वोपद्रवनाशिनी ॥ ब्रह्मक्षत्रियविट्शूद्रैःस्त्रीभिःकार्याविशेषतः ॥ १५ ॥ अत्रार्थेयत्पु-
रावृत्तंप्रवक्ष्यामिकथानकम् ॥ पुराकृतयुगेराजाविदर्भायांबभूवह ॥ १६ ॥

सारे पापोंको नाश करनेवाला, सम्पूर्ण उपद्रवोंका शान्त करनेवाला यह ऋषिपंचमीका व्रत ब्राह्मण, क्षत्रिय, वैश्य, शूद्र, सबकोही करना चाहिये, जिसमें स्त्रियोंको तो विशेषकरके, करना चाहिये ॥ १५ ॥ इसी विषे जो प्राचीन कथाका वृत्तान्त है सो मैं कहता हूं–पहले सत्ययुगमें विदर्भनगरीमें चारों वर्णोंको पालनेवाले राजाओंमें ऋषिकी

समान श्रेष्ठ एक राजा श्येनजित् हुए थे.उनके देशमें अंगोंसहित वेदोंके अन्तका जाननेवाला ॥१६॥१७॥ सम्पूर्ण प्राणियोंके हितका करनेवाला, खेतीके कर्मसे कुटुम्बका पालन करनेवाला, एक सुमित्र नामवाला ब्राह्मण रहता था ॥ १८ ॥ उस ब्राह्मणकी बड़ी पतिव्रता, पतिकी सेवामें तत्पर, अनेक भृत्य ( नौकर ) और कुटुम्बियोंसे युक्त, जयश्री

श्येनजिन्नामराजर्षिश्चातुर्वर्ण्यानुपालकः ॥ तस्यदेशेऽवसद्विप्रोवेदवेदांगपारगः ॥१७॥ सुमित्रो-
नामराजेंद्रसर्वभूतहितेरतः ॥ कृषिवृत्त्यासदायुक्तःकुटुंबपरिपालकः ॥१८॥ तस्यभार्यासुसाध्वी
चपतिशुश्रूषणेरता ॥ जयश्रीर्नामविख्याताबहुभृत्यसुहृज्जना ॥ १९ ॥ अतिचिंतान्वितासाच
प्रावृट्कालेसुमध्यमा ॥ क्षेत्रादिषुरतासाध्वीव्याकुलीकृतमानसा ॥ २० ॥ एकदासाऽऽत्मनः
प्राप्तमृतुकालंव्यलोकयत् ॥ रजस्वलापिसाराजन्गृहकर्मचकारह ॥ २१ ॥

नामवाली एक स्त्री थी ॥ १९ ॥ एक समय वर्षाकालमें अत्यन्त चिन्तासे युक्त, सुन्दर कमरवाली, खेतके काममें लगी हुई उस पतिव्रताका चित्त अत्यन्त व्याकुल हुआ ॥ २० ॥ एक समय उस स्त्रीने अपने ऋतुकालको आता देखा और हे राजन् ! वह रजस्वला होकरभी, घरके कामको करती रही ॥ २१ ॥

हे राजन् ! ऋतुकालके प्राप्त होनेपरभी उसने भांडादिक सब छुए और वह स्त्री थोड़ेही समयमें मृत्युको प्राप्त हुई ॥२२॥ और उसका पतिभी समयानुसार मृत्युके वश हुआ. इसप्रकार वे दोनों स्त्रीपुरुष अपने कर्मोंके वश हुए॥२३॥ उसकी वह स्त्री जयश्री ऋतुकालकी बर्तन आदि सबको छूनेके दोषसे कुतियाकी योनिमें प्राप्त हुई, और हे राजन् !

भांडादीन्यस्पृशद्राजन्नृतौप्राप्तेऽपिभामिनी ॥ कालेनबहुनासाध्वीपंचत्वमगमत्तदा ॥ २२ ॥ त
स्याभर्तापिविप्रोऽसौकालधर्ममुपेयिवान् ॥ एवंतौदंपतीराजन्स्वकर्मवशगौतदा ॥ २३ ॥
भार्यातस्यजयश्रीःसाऋतुसंपर्कदोषतः ॥ शुनीयोनिमनुप्राप्तासुमित्रोऽपिनरेश्वर ॥ २४॥ तस्याः
संपर्कदोषेणबलीवर्दोबभूवह ॥ एवंतौदंपतीराजन्स्वकर्मवशगौतदा ॥ २५ ॥ ऋतुसंपर्कदोषेणति
र्यग्योनिमुपागतौ ॥ स्वधर्माचरणाज्जातावुभौजातिस्मरौतथा ॥ २६ ॥

वह सुमित्र ब्राह्मणभी ॥ २४ ॥ उस स्त्रीकी संगतिके दोषसे उस समय बलीवर्द ( बैल) हुआ. हे राजन्! तब वे दोनों स्त्री पुरुष इसप्रकार अपने २ कर्मोंके वशीभूत हुए ॥ २५ ॥ ऋतुकालकी संगतिके दोषसे वोह दोनों पशुयोनिमें प्राप्त होकर, अपने धर्मके प्रतापसे अपनी जातिको याद करनेवाले हुए ॥ २६ ॥

हेराजन् ! तिसी प्रकार अपने पहले करे हुए पापकोभी याद करते हुए पुत्रकेही घर उत्पन्न हुए. गुरुकी अत्यंत शुश्रूषा करनेवाला, धर्मको जाननेवाला, देवता और अभ्यागतोंकी पूजा करनेवाला सुमतिनाम सुमित्राका पुत्र था. इसके पीछे पिताके क्षयाहके प्राप्त होनेपर वह सुमति उस समय ॥२७ ॥२८॥ श्रद्धासे युक्त होकर अपनी चन्द्रवती स्त्रीसे बोला कि-

सुतस्यैवगृहेराजन्स्मरंतौपूर्वपातकम् ॥ सुमित्रस्यचपुत्रोऽभूद्गुरुशुश्रूषणेरतः ॥ २७ ॥ सुमतिर्नामधर्मज्ञोदेवतातिथिपूजकः॥ अथक्षयाहेसंप्राप्तेपितुस्तुसुमतिस्तदा ॥२८॥ भार्यांचंद्रवतींप्राहसुमतिःश्रद्धयान्वितः ॥ अद्यसांवत्सरदिनंपितुर्मेचारुहासिनी ॥ २९ ॥ भोजनीयाद्विजाभीरुपाकसिद्धिर्विधीयताम् ॥ तथाकृतापाकसिद्धिःसुमतेर्भर्तुराज्ञया ॥ ३० ॥ मुक्तंपायसभांडेवैसर्पेणगरलंततः ॥ दृष्ट्वाब्रह्मवधाद्भीताशुनीभांडानिसाऽस्पृशत् ॥ ३१ ॥

हे मनोहर हास्य करनेवाली! आज मेरे पिताकी वर्षीका दिन है ॥ २९ ॥ हे अधिकभय करनेवाली! आज ब्राह्मणोंको भोजन कराना उचित है, सो तू जाकर, पाक ( भोजन ) तयार कर. सुमति नाम अपने पतिकी आज्ञासे उस चन्द्रवतीने सब भोजन करे ॥ ३० ॥ तदनन्तर खीरके पात्रमें सर्पने विष छोड़ दिया. उसको देखकर, ब्राह्मणोंके मर जानेके

भयसे खीरके पात्रको उस कुतियाने छू दिया ॥ ३१ ॥ पात्रको छूति हुई उस कुतियाको देखकर, उस चन्द्रवती ब्राह्मणकी स्त्रीने उसे जलती लकड़ीसे मारा और उस सुन्दर कमरवाली चन्द्रावतीने भोजनको छोड़ सब बर्तनोंको धोकर ॥ ३२ ॥ फिर दूसरा पाक बनाकर बड़ी विधिसे श्राद्धको करके ब्राह्मणोंके जीम जानेपर उसने जमीनमें

द्विजभार्याचतांदृष्ट्वाउल्मुकेनजघानह ॥ भांडादीनिचप्रक्षाल्यत्यक्त्वापाकंसुमध्यमा ॥ ३२ ॥
पुनःपाकंचकृत्वातुश्राद्धंकृत्वाविधानतः ॥ ततोभुक्तेषुविप्रेषुनोच्छिष्टंचददौबहिः ॥ ३३ ॥ भूमौ
क्षिप्तंतयाशुन्याउपवासस्तदाऽभवत् ॥ ततोरात्र्यांप्रवृत्तायांसाशुनीक्षुधिताभृशम् ॥ ३४ ॥ बली
वर्दमुपागत्यभर्तारमिदमब्रवीत् ॥ बुभुक्षिताऽद्यहेभर्तर्नदत्तंभोजनादिकम् ॥ ३५ ॥

पड़ी हुई ब्राह्मणोंकी जूठन बाहर नहीं दी· तब उस कुत्तीको व्रतही होगया· फिर रात होनेपर अत्यन्त क्षुधा (भूख) ॥ ३३ ॥ ३४ ॥ अपने पति उस बलीवर्दके पास आकर, यह बोली कि–हे नाथ ! आज मैं बहुत भूखी हूं, किसीने मुझे भोजनादिक कुछभी नहीं दिया ॥ ३५ ॥

आज तौ एक ग्रासतकभी मैंने नहीं पाया, इसकारण भूंख मुझे अधिक बाधा करती है. दूसरे दिन तौ यह हमारा पुत्र मुझे भोजन देता था ॥ ३६ ॥ आज तौ इसने मुझे जरा जूंठनतकभी नहीं दी. आज खीरमें सर्पका विष गिरगया था ॥ ३७ ॥ सो तिससे यह बड़े २ श्रेष्ठ ब्राह्मण मर जांयगे ऐसा मैंने विचार कर, जाके खीरको छू दिया. इसकारण बहुने,

ग्रासादिकंचनप्राप्तंक्षुधामांबाधतेभृशम् ॥ अन्यस्मिन्दिवसेपुत्रोममलेह्यंददात्यसौ ॥ ३६ ॥ अद्य मह्यंकिमप्येषउच्छिष्टमपिनोददौ ॥ पायसान्नेपपाताद्यगरलंसर्पसंभवम् ॥ ३७ ॥ मयाविचिंत्य मनसामरिष्यंतिद्विजोत्तमाः ॥ संस्पृष्टंपायसंगत्वाबध्वाऽहंताडिताभृशम् ॥ ३८ ॥ दुःखितंतेनमे गात्रंकटिर्भग्नाकरोमिकिम् ॥ ततःप्राहसचानड्वान्भद्रेतेपापसंग्रहात् ॥ ३९ ॥ किंकरोमिह्यशक्तोऽहं भारवाहत्वमागतः ॥ अद्याहमात्मनःक्षेत्रेवाहितःसकलंदिनम् ॥ ४० ॥

मुझे बहुत मारा ॥ ३८ ॥ उस मारनेसे मेरा शरीर बहुत दुःखित हुआ और मेरी कमरभी टूट गई सो मैं क्या करूं ? यह सुनकर, वोह बलीवर्द बोला कि–हे सुभगे ! तेरे पापके संग्रहसे ॥ ३९ ॥ मैंभी बोझेके उठानेको प्राप्त होनेके कारण बड़ा दुबला होगया सो अब क्या करूं ? आजके दिन मैं अपने पुत्रके खेतमें सारा दिन चलाया गया ॥ ४० ॥

बड़ा दुबला होगया सो अब क्या करूं ? आजके दिन में अपने पुत्रके खेतमें सारा दिन चलाया गया ॥ ४० ॥

और इस मेरे पुत्रने भूंखको प्राप्त हुए मेरे मुखको बांधकर मुझे बहुत मारा. इसने यह आज श्राद्ध वृथाही करा; क्योंकि मुझे तौ आज बड़ा कष्ट हुआ ॥ ४१ ॥ इतनी कथा सुनाय श्रीकृष्णजी बोले कि–हे युधिष्ठिर ! उन दोनों मातापिताके इस प्रकार कथन करते समय जो कुछ उन दोनोंने कहा उसको वह उनका पुत्र सुनकर ॥ ४२ ॥ उस सुमतिने उन्हें अपने

मारितश्चात्मजेनाहंमुखंबध्वाबुभुक्षितः ॥ वृथाश्राद्धंकृतंतेनजाताऽद्यममकष्टता ॥ ४१ ॥ कृष्ण उवाच ॥ तयोःसंवदतोरेवंमातापित्रोश्चभारत ॥ श्रुत्वापुत्रस्तथावाक्यंयदुक्तंचतदोभयोः॥ ४२ ॥
पितरौतौविदित्वातुदत्तवान्सुमतिस्तदा ॥ तस्यांरजन्यांतत्कालंददौतस्यैचभोजनम् ॥ ४३ ॥
तदाऽसौदुःखितःपुत्रोज्ञात्वावस्थांतथातयोः ॥ मातापित्रोस्तुराजेंद्रद्रुतंसंप्रस्थितोवनम् ॥ ४४ ॥
ज्ञातुमिच्छामिवैकष्टमितिनिश्चित्यभारत ॥ तत्रगत्वाज्ञानवृद्धानृषीन्परमधार्मिकान् ॥ ४५ ॥

माता और पिता जानकर, उस रात्रिमें उसीसमय उस अपनी माताको भोजन दिया ॥ ४३ ॥ हे राजेन्द्र ! तदनन्तर उन माता पिताकी उस दशाको देखकर, वह पुत्र दुःखी होकर, शीघ्रही वनको चलागया ॥ ४४ ॥ हे राजन् ! इनके कष्टके जाननेकी इच्छा करके, सुमतिने वनमें जाकर, ज्ञानियोंमें श्रेष्ठ बड़े धर्मज्ञ ऋषियोंको ॥ ४५ ॥

नमस्कार करके, उन दोनोंके हितकारी बचन उस समय कहे. सुमति बोला—हे ब्राह्मणोंमें श्रेष्ठो! तुम एकाग्रचित्त होकर एक प्रश्नके उत्तरको कहो ॥ ४६ ॥ हे तपरूपी धनवाले ऋषियो ! कौनसे कर्मके फलसे मेरे माता पिता इस अवस्थाको प्राप्त हुए हैं ? और उस पातकसे वोह दोनों किस प्रकार छूटेंगे ? ॥ ४७ ॥ श्रीकृष्णजी बोले, कि—दुःखित सुमतिके

**प्रणिपत्याब्रवीद्वाक्यंहितंचैवतदातयोः ॥ सुमतिरुवाच ॥ कथयध्वंविप्रवर्याःप्रश्नमेकंसमाहिताः**
**॥ ४६ ॥ केनकर्मविपाकेनपितरौमेतपोधनाः ॥ इमामवस्थांसंप्राप्तौमोक्ष्येतेपातकात्कथम् ॥४७॥**
**कृष्णउवाच ॥ तदाकर्ण्यवचस्तस्यसुमतेर्दुःखितस्यच ॥ ऋषिःसर्वतपानामसर्वज्ञःकरुणान्वितः**
**॥ ४८ ॥ सुमतिंप्रत्युवाचेदंतत्पित्रोर्मुक्तयेतदा ॥ ऋषिरुवाच ॥ तवमातापुराविप्रस्वगृहेबालभाव**
**तः ॥४९॥ प्राप्तमृतुंविदित्वातुसंपर्कमकरोद्विज ॥ तेनकर्मविपाकेनशुनीयोनिमुपागता ॥ ५० ॥**

उस वचनको सुनकर, दयायुक्त, सर्व जाननेवाले सर्वतपा नाम ऋषि ॥ ४८ ॥ सुमतिसे तब तिसके मातापिताकी मुक्तिके लिये वचन बोले. ऋषि बोले—हे विप्र ! तेरी माता पहले अपने घरमें मूर्खपनेसे ॥ ४९ ॥ ऋतुकालको जानकरभी सब काम करती रही. हे विप्र ! उसी कर्मके विपाकसे वह कुतियाकी योनिमें प्राप्त हुई है ॥ ५०॥

और उसके स्पर्श करनेके दोषसे तेरा पिताभी वृषभ हुआ. इनकी मुक्तिके अर्थ तुम ऋषिपंचमीके व्रतको करो ॥ ५१ ॥ हे ब्राह्मणोंमें श्रेष्ठ ! तुम अपनी स्त्रीसहित बड़े यत्नसे ऋषियोंका पूजन करके, हे द्विजोत्तम ! सातवर्षतक उस व्रतको करो ॥ ५२ ॥ और सात वर्षपीछे धनकी कृपणताको छोड़ कर, उद्यापन करै और शाक तथा समा अथवा पसाईके

पिताऽपिस्पर्शदोषेणबलीवर्दोबभूवह ॥ एतयोर्मुक्तिकामार्थंकुरुत्वमृषिपंचमीम् ॥ ५१॥ भार्यया सहविप्रेंद्रऋषीन्संपूज्ययत्नतः ॥ आचरस्वव्रतंतत्रसप्तवर्षैर्द्विजोत्तम ॥ ५२ ॥ अंतेचोद्यापनंकुर्याद्वित्तशाठ्यविवर्जितः ॥ शाकाहारस्तुकर्तव्योनीवारैःश्यामकैस्तथा ॥ ५३ ॥ कंदैर्वाथफलैर्मूलैर्हलकृष्टंनभक्षयेत् ॥ प्राप्यभाद्रपदेमासिशुक्लपक्षस्यपञ्चमीम् ॥ ५४ ॥ तस्यांमध्याह्नसमयेनद्यांवैविमलेजले ॥ कृत्वाऽपामार्गसमिधादन्तधावनमादितः ॥५५॥

चावल आदिकोंका भोजन करै ॥ ५३ ॥ अथवा कन्द-मूल-फलादिकोंका भोजन करै और हलके जोतेहुएका भक्षण न करै. भाद्रपदके शुक्लपक्षकी पंचमीतिथि प्राप्त होनेपर ॥ ५४ ॥ उस पंचमीके दिन मध्याह्न समय ( दुपहर )

१ " कर्तव्यःश्यामाकाहारएवच ॥ नीवारैर्वाऽपिकर्तव्योहलकृष्टंनभक्षयेत्" इत्यपिपाठः । अत्राहारइतिशेषः ।

यानी बारह बजनेके समय नद्यादिकोंके स्वच्छ जलमें दंतधावन ( दतून ) आदि करके ॥ ५५ ॥ "हे वन-
स्पति ! तुम आयु, बल, यश, सन्तान, पशु, धनादिक–त्रिगुणातीत, तुरीय, चैतन्य; शुद्धबुद्धि तथा लौकिक
बुद्धिको मुझे दो ॥ ५६ ॥ मुखकी दुर्गन्धिको दूर करनेके अर्थ, और दांतोंकी शुद्धिके अर्थ, इस पूर्वोक्त मंत्रसे प्रार्थना

आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ ५६ ॥ संप्रार्थ्या
नेनमंत्रेणकुर्याद्वैदंतधावनम् ॥ मुखदुर्गंधिनाशायदंतानांचविशुद्धये ॥ ५७ ॥ ष्ठीवनायचगात्रा
णांकुर्वेऽहंदंतधावनम् ॥ अनेनदन्तान्संशोध्यस्नायान्मृत्स्नानपूर्वकम् ॥ ५८ ॥ तिलामलकक
ल्केनकेशान्संशोध्ययत्नतः ॥ परिधायनवेशुद्धेवाससीचसमाहितः ॥ ५९ ॥

करके दन्तधावन करै ॥ ५७ ॥ अपने अंगोंके शुद्ध करनेके अर्थ मैं दन्तधावन करता हूं" इसप्रकार कहकर, दांतोंको
शुद्ध करके पहले मिट्टीसे स्नान करके, फिर जलसे स्नान करै ॥ ५८ ॥ तिल, अमला, बालछड़-आदि शिर धोनेके
पवित्र २ मसालोंसे बालोंको बड़े यत्नसे धोकर, नवीन और शुद्ध वस्त्रोंको पहर कर, तथा एकाग्रचित्तसे ॥ ५९ ॥

अरुन्धतीसहित दिव्य वेषधारी सप्त ऋषियोंकी पूजा करो. कश्यप, अत्रि, भरद्वाज, विश्वामित्र और गौतमजी ॥ ६०॥ जमदग्नि वसिष्ठजी और पतिव्रता तथा अरुन्धती इन सप्तऋषियोंको एकचित्त होकर, विधिपूर्वक पूजै ॥ ६१ ॥ हे द्विजोत्तम! इस ऋषिपंचमीके व्रत करनेसेही ऋतुकालकी संगतिसे उत्पन्न हुआ सम्पूर्ण दोष नाशको प्राप्त होजाताहै

पूजयस्वऋषीन्नदिव्यानरुंधत्यासमन्वितान् ॥ कश्यपोऽत्रिर्भरद्वाजोविश्वामित्रोऽथगौतमः ॥६०॥ जमदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती ॥ मंत्रेणानेनसप्तर्षीन्पूजयेत्सुसमाहितः ॥ ६१ ॥ व्रतेनऋषिपंचम्याःकृतेनैवद्विजोत्तम ॥ ऋतुसंपर्कजोदोषःक्षयंयातिनसंशयः ॥६२॥ श्रीकृष्णउवाच ॥ तच्छ्रुत्वासुमतिर्वाक्यंपरममृषिभाषितम् ॥ गृहमेत्यव्रतंचक्रेसभार्यःश्रद्धयाऽन्वितः ॥ ६३ ॥ व्रतंतुऋषिपंचम्याःसर्वपापप्रणाशनम् ॥ कृत्वासर्वंयथोक्तंचमातापित्रोःफलंददौ ॥ ६४ ॥

इसमें सन्देह कुछभी नहीं है॥६२॥ श्रीकृष्णजी बोले, कि–ऋषिका वह उत्कृष्ट भाषण सुनकर, उस सुमतिने अपने घर आकर, स्त्रीसहित श्रद्धायुक्त हो वोह व्रत करा ॥६३॥ ऋषिपंचमीका यह व्रत सम्पूर्ण पापोंका नाश करनेवाला है. इसी

१ प्रयत्नेनेत्यपि पाठः ।

ऋषिपंचमीके व्रतको जिसप्रकार ऋषिने कहा था उसप्रकार यत्नपूर्वक करके सुमतिने उस व्रतके फलको अपने माता-पिताको दे दिया ॥६४॥ हे राजेन्द्र ! उस व्रतसे उत्पन्न हुए पुण्यप्रभावसे उसकी माता कुतियाकी योनिसे छूटकर, श्रेष्ठ विमानमें बैठकर ॥ ६५ ॥ दिव्य वस्त्रोंको पहर कर, स्वर्गको चलीगई. और हे युधिष्ठिर ! उस सुमतिका पिताभी

**व्रतपुण्यप्रभावेण मातातस्यश्वयोनितः ॥ मुक्तानृपतिशार्दूलविमानवरसंस्थिता ॥ ६५ ॥ दिव्यांबरधराभूत्वागतास्वर्गंचभारत ॥ पिताऽपिसमृतोमुक्तःसुमतेःपशुयोनितः ॥ ६६ ॥ स्वर्गं प्राप्तोमहाराजव्रतस्याऽस्यप्रभावतः ॥ कायिकंवाचिकंवापिमानसंयच्चदुष्कृतम् ॥ ६७ ॥ तत्सर्वं विलयंयातिव्रतस्यास्यप्रभावतः ॥ तस्ययज्जायतेपुण्यंतच्छृणुष्वनृपोत्तम ॥ ६८ ॥ सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषुयत्फलम् ॥ सर्वदानेषुदत्तेषुतदेतद्व्रतचारणात् ॥ ६९ ॥**

मरकर पशुयोनिसे छूट ॥ ६६ ॥ इस ऋषिपंचमीके महाव्रतके प्रभावसे स्वर्गको गया. हे राजन् ! शरीरसे अथवा मनसे वा वाणीसे जो कुछ इकठा कराहुआ दुष्कर कर्म है ॥ ६७ ॥ वह सम्पूर्ण इस व्रतके प्रभावसे नष्ट होजाता है और हे राजाओंमें श्रेष्ठ ! जो कुछ उसका पुण्य होता है वह तुम सुनो ॥ ६८ ॥ जो कुछ सम्पूर्ण व्रतोंके करनेसे पुण्य

प्राप्त होता है और सम्पूर्ण तीर्थ करनेसे जो फल होता है तथा सर्वस्व दान करनेसे जो फल है, वह इस ऋषिपंचमीके व्रताचरण करनेसे होता है ॥ ६९ ॥ जो स्त्री इस व्रतको करती है वोह बड़े २ सुखोंको भोगती है. रूपलावण्य अर्थात् रूपकी सुन्दरता और पुत्र पौत्रादिकोंसहित ॥ ७० ॥ इसलोकमें आनन्द भोगती है और परलोकमें मोक्षको पाती है. हे राजन् ! यह सब व्रतोंमें उत्तम व्रत हमने तुम्हारे अर्थ कहा ॥ ७१ ॥ हे युधिष्ठिर ! यह व्रत सारी सम्पत्तियोंका

कुरुतेयाव्रतंनारीसाभवेत्सुखभागिनी ॥ रूपलावण्ययुक्ताचपुत्रपौत्रादिसंयुता ॥ ७० ॥ इहलोकेसदैवस्यात्परत्रचपरांगतिम् ॥ एतत्तेकथितंराजन्व्रतानामुत्तमंव्रतम् ॥ ७१ ॥ सर्वसंपत्प्रदंचैवनारीणांपापनाशनम् ॥ धन्यंयशस्यंस्वर्ग्यंचपुत्रदंचयुधिष्ठिर ॥ पठतांशृण्वतांचापिसर्वपापप्रणाशनम् ॥ ७२ ॥ इतिश्रीभविष्योत्तरपुराणेऋषिपंचमीव्रतकथासंपूर्णा ॥ ॥

देनेवाला है और स्त्रियोंके सम्पूर्णपापोंका नाश करता है. और यह व्रत धन,यश, स्वर्ग तथा पुत्रादि सुखका देनेवाला है और पढ़ने तथा सुननेवालोंकेभी सारे पापोंका नाश करता है ॥ ७२ ॥ इति श्रीभविष्योत्तरपुराणान्तर्गतऋषिपंचमीव्रतकथा व्रजरत्नभट्टाचार्यकृतभाषाटीकासहिता समाप्ता ॥

---

१ प्राप्नोतीतिशेषः ।

॥ अथ उद्यापनविधिः ॥ राजा युधिष्ठिरजी बोले कि–इस व्रतके पूर्ण होनेके फलका देनेवाला इसका उद्यापन क्या है? और सुमतिने इसके उद्यापनको किस प्रकार करा? सो सब तुम कहो ॥ १॥ श्रीकृष्णजी बोले कि–पहले दिन एक बखत भोजन करै. प्रातःकाल उठकर, अच्छी प्रकार स्नान करके, गुरुके घर जाय ॥ २ ॥ और अपने गुरुसे कहै

**युधिष्ठिरउवाच ॥ किमस्योद्यापनंप्रोक्तंव्रतपूर्णफलप्रदम् ॥ सुमतिःकेनविधिनाचकारवदतत्त्वतः ॥ १ ॥ कृष्णउवाच ॥ पूर्वस्मिन्दिवसेकुर्यादेकभुक्तंसमाहितः ॥ प्रातरुत्थायसुस्नातस्ततोगुरुगृहंव्रजेत् ॥ २ ॥ प्रार्थयेत्तंममाचार्योभवोद्यापनकर्मणि ॥ पूर्वोक्तेनैवविधिनास्नात्वाभक्त्यासमन्वितः ॥ ३ ॥ शुचौदेशेसमालिप्यसर्वतोभद्रमंडले ॥ अव्रणंसजलंकुभंताम्रंमृन्मयमेवच ॥ ४ ॥ संस्थाप्यवस्त्रसंवीतंकंठदेशेसुशोभनम् ॥ पंचरत्नसमायुक्तंफलगंधाक्षतैर्युतम् ॥ ५ ॥**

कि उद्यापनके काममें आप मेरे आचार्य हूजिये. और भक्तियुक्त पूर्वोक्त विधिसे स्नान करके ॥ ३ ॥ अच्छे पवित्र स्थानमें लीपर, सर्वतोभद्रके मंडलमें व्रण ( छिद्र ) रहित जलसहित मट्टीके घड़ेको स्थापन करके ॥ ४ ॥ वस्त्रसे कंठमें शोभित, पंच रत्नोंसे युक्त और फल, सुगंधि तथा अक्षतोंसहित ॥ ५ ॥

१ 'विद्रुमं हीरकं नीलं पद्मरागं च मौक्तिकम्। पञ्चरत्नमिदं प्रोक्तमिति'॥ अर्थ–मूंगा१, हीरा२, नीलम३, माणिक४, मोती५ इन्हें पञ्चरत्न कहते हैं.

१ 'विद्रुमं हीरकं नीलं पद्मरागं च मौक्तिकम्। पञ्चरत्नमिदं प्रोक्तमिति'॥ अर्थ—मूंगा१, हीरा२, नीलम३, माणिक४, मोती५ इन्हें पञ्चरत्न कहते हैं.

सुवर्ण अथवा तांबेके टुकडेसे उसको आच्छादित करके, यवोंसे परिपूर्ण बांस वा मट्टीके पात्रकरके ॥ ६ ॥ वस्त्रके ढकर अष्टदल कमल लिखे; और पूजित आत्मावाले ऋषियोंकी मूर्ति बनावै ॥ ७ ॥ वोह प्रतिमा एक पलकी, आधे पलकी, वा चौथाई पलकी बनावै. अथवा जैसी शक्ति हो, धनकी कृपणतारहित होकर बनावै ॥ ८ ॥ पचरंगी चँदोवा

सहिरण्यंसमाच्छाद्यताम्रेणपटलेनवा ॥ वंशमृन्मयपात्रेणयवपूर्णेनचैवहि ॥ ६ ॥ आच्छादयेत्तुचैलेनलिखेदष्टदलंततः ॥ सौवर्ण्यःप्रतिमाःकार्याऋषीणांभावितात्मनाम् ॥ ७ ॥ पलेनवातदर्धेनतदर्धार्धेनवापुनः ॥ शक्त्यावाकारयेत्तत्रवित्तशाठ्यविवर्जितः ॥ ८ ॥ वितानंपंचवर्णंचफलपुष्पसमन्वितम् ॥ बध्नीयादुपरिश्रीमत्संभारान्संविधायच ॥ ९ ॥ मध्याह्नेपूजयेद्भक्त्याऋषीन्श्रद्धासमन्वितः ॥ कश्यपोऽत्रिर्भरद्वाजोविश्वामित्रोऽथगौतमः ॥ जमदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती ॥ १० ॥

बांधकर, उसके चारों और फूलफलसहित बन्दनवार बांधै, इसप्रकार सब सामान करके ॥ ९ ॥ मध्याह्नसमय श्रद्धाभक्तिसहित ऋषियोंका पूजन करै, वे ऋषि ये हैं कि—कश्यप, अत्रि, भरद्वाज, विश्वामित्र, गौतम, जमदग्नि,

वसिष्ठ और उन वसिष्ठजीकी पतिव्रता स्त्री अरुन्धती. ॥ १० ॥ हे राजेंद्र ! इस मंत्रसे सावधान होकर पूजन करै ॥११॥ पुराण कथादिकोंका श्रवण करके, रात्रिको जागरण ( रतजगा ) करै. प्रातःकालकी नित्यकृत्य करके, तिल और घीसे होम करै ॥ १२ ॥ तदनन्तर वैदिक अथवा पौराणिक तथा मनुस्मृति आदि स्मार्तमतसे 'सहच्छन्दस'

मंत्रेणानेनराजेंद्रकृत्वापूजांसमाहितः ॥ ११ ॥ रात्रौजागरणंकुर्यात्पुराणश्रवणादिभिः ॥ कृत
नित्यक्रियःप्रातर्जुहुयात्तिलसर्पिषा ॥ १२ ॥ वैदिकोवाथपौराणअधिकारान्मनुःस्मृतः ॥
सहस्तोमाःसहावाथनाममन्त्रैस्तुवापृथक् ॥ अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा ॥ १३ ॥ पुनः
पूजांततःकृत्वागुरुंसंपूजयेद्व्रती ॥ स्वर्णांगुलीयवासोभिःकुंडलामृतभोजनैः ॥ १४ ॥

ऐसे वेदोक्त मंत्रसे अथवा ऋषियोंके नाममंत्रोंसेही न्यारी न्यारी एक हजार आठ अथवा एकसौ आठ आहुती देवे १३ फिर पूजाओंको करके, वोह व्रत करनेवाला सुवर्णकी अंगूठी और वस्त्र तथा कुंडलादि–आभूषण और अमृतके समान

१ असंधिरार्षः ।

भोजनोंसे गुरुकी पूजा करै ॥ १४ ॥ और बहुत दूध देनेवाली बछडेसहित एक गौ गुरुको दे, वस्त्र और दक्षिणादि-कोंसे सात होम करनेवालोंकी पूजा करै ॥ १५ ॥ उन ऋत्विजोंको भक्तिपूर्वक कलश और यज्ञोपवीत दे और स्त्रीसहित आचार्यको प्रणाम करके, क्षमा करावे ॥ १६ ॥ ब्राह्मण और दीनोंका भक्तिसे भोजन करावै तथा रक्षकरहित

दद्यादेकांसवत्सांचगुरवेगांपयस्विनीम् ॥ पूजयेदृत्विजःसप्तवासोभिर्दक्षिणादिभिः ॥ १५ ॥
कलशानुपवीतानिदद्यात्तेभ्यःसुभक्तितः ॥ आचार्यंचसपत्नीकंप्रणिपत्यक्षमापयेत् ॥ १६ ॥
भोजयेद्ब्राह्मणान्भक्त्यादीनानाथान्प्रतर्प्यच ॥ लब्ध्वानुज्ञांतुभुंजीतइष्टैर्बंधुजनैःसह ॥ १७ ॥
उद्यापनविधिःप्रोक्तःसर्वत्रायंफलार्थिनाम् ॥ एवंयाकुरुतेभूपउद्यापनविधिंपरम् ॥ १८ ॥ सर्वपाप
विनिर्मुक्तास्वर्गेलोकेमहीयते ॥ इहलोकेचिरंकालंभर्त्रासहशुचिस्मिता ॥ १९ ॥

प्राणियोंको दान देकर और गुरुआदिकोंकी आज्ञा पाकर, कुटुम्बी–आदिकोंसहित आपभी भोजन करै ॥ १७ ॥ हे राजन्! सब जगह फलकी इच्छा करनेवालोंके अर्थ यह उद्यापनकी विधि कही है. इस उद्यापनकी परमविधिको जो स्त्री करती है ॥ १८ ॥ वोह सारे पापोंसे छूटकर, स्वर्गलोकमें ऐश्वर्यको भोगती है; इस लोकमें बहुत कालपर्यन्त सुन्दर

हास्यवाली वह कान्ता अपने पतिसहित ॥ १९ ॥ और पुत्रपौत्रादिकोंसे युक्त मनोहर २ भोगोंको भोगकर, निष्पाप हो, सुन्दर आचरणवाली निरन्तर अक्षय गतिको प्राप्त होती है ॥ २० ॥ इति श्रीमुरादाबादनिवासि—महर्षि-

पुत्रपौत्रैःपरिवृताभुक्त्वाभोगान्मनोहरान् ॥ निष्पापासुभगानित्यंलभतेचाक्षयांगतिम् ॥ २० ॥

इतिश्रीभविष्योत्तरपुराणेऋषिपंचमीव्रतोद्यापनविधिःसमाप्तः ॥

कुमार—व्रजरत्नभट्टाचार्यकृतभाषाटीकासहित—भविष्योत्तरपुराणान्तर्गतऋषिपंचमीव्रतोद्यापनविधिः समाप्तः ॥

दोहा—सप्तऋषिनको सुमिरिकै, ध्यानराम उर धार ॥ कियो तिलक ‘ व्रजरत्न ’ ने निजमतिके अनुसार ॥ १ ॥

सटीकमिदं पुस्तकं मुम्बय्यां भगीरथात्मज हरिप्रसाद इत्येतैः “ जगदीश्वराख्ये ”
मुद्रणालये मुद्रापयित्वा प्राकाश्यमानीतम् ॥ शके १८३१ चैत्रमासः ॥

पुस्तक मिलनेका ठिकाना–

हरिप्रसाद भगीरथजीका पुस्तकालय.

कालकादेविरोड् रामवाड़ी मुंबई.

हनुमानदास ब्रजवल्लभजीका पुस्तकालय.

ठिकाना. चौक–कानपूर.

॥ इति भाषाटीकासहिता ऋषिपंचमीव्रतकथा समाप्ता ॥

पुस्तक लौटाने की तिथि अन्त में अङ्कित है । इस तिथि को पुस्तक न लौटाने पर दस नये पैसे प्रति पुस्तक अतिरिक्त दिनों का अर्थदण्ड आप को लगाया जायेगा ।

१.१४।

| Date | No. | Date | No. |
| --- | --- | --- | --- |